# विष्णुधर्मोत्तरपुराणे वास्तुविद्या-चित्रकलाश्च

**S.N.Krishnasharma**

**Abstract**

पुराणवाङ्मये प्रतिपादितानामपि तत्तल्ललितकला विषयाणां प्राधान्यं वर्तत एवेत्यत्र न कापि संशीतिः। ललितकलानाम् अन्यतमायाश्चित्रकलायाः प्रतिपादकेषु विष्णुधर्मोत्तरपुराणं मूर्धन्यं वर्तते। वास्तुविद्या तावत् संहितान्तर्गतानेकविभागात्मिका वर्तते। स्थापत्यविज्ञाने स्वतन्त्रग्रन्थाः समराङ्गणसूत्रधार - काश्यपशिल्प - विश्वकर्मप्रकाशादयस्तथा अपराजितपृच्छा प्रभृतयश्च सन्ति। एतत् विषये बृहत्संहितायां सांवत्सरसूत्राध्यायेऽस्य सम्यक् विधानं प्राप्यते। प्राकृतिकविकारो न भवेत्तदनुरोधेन मानवीयशुभसाधकत्वेन भारतीयवास्तुविज्ञानं निर्दिष्टमस्ति। वास्तुविद्या संबन्धिनां तथा चित्रकला संबन्धिनां विशेषाणां विमर्शनमेव अस्य लद्धशोधप्रबन्धस्य प्रतिपाद्यो विषयः।

स्मृतिग्रन्थेषु मन्वादिभिर्यद् वर्णितं तेनापि पुराणानां ज्ञानमावश्यं भवति।

यथा भगवता[1] मनुनोक्तम् -

‘स्वाध्यायं श्रावयेत् पित्र्ये धर्मशास्त्राणि चैव हि।
आख्यानानीतिहासांश्च पुराणानि खिलानि च’ ॥

स्मृतिषु दैनिक यमनियमाः, व्रत-प्रायश्चित्त- श्राद्ध -होम-कर्माणि, वर्णाश्रम-विवाह-राजकर्माणि च यान्युल्लिखितानि तान्येव पुराणोपपुराणेष्वपि दृष्टिगोचराणि भवन्ति। स्कन्धपुराणस्य रेवाखण्डे[2] एवं प्रतिपादितं यत्पुरा वेदाः पुराणेषु प्रतिष्ठिता आसन्। पुराणं वेदेषु भवति। वेदेषु स्मृतिषु च यत् दृश्यते तत्सर्वं पुराणेषु प्रतिपाद्यते। यथोक्तं -

“वेदाः प्रतिष्ठिताः पूर्वं पुराणे नात्र संशयः।
आत्मा पुराणं वेदानां पृथङ्गानि तानि षट् ॥
यन्न दृष्टं हि वेदेषु तद्दृष्टम् स्मृतिभिः किल।
उभाभ्यां यन्न दृष्टं हि तत्पुराणेषु गीयते ॥ इति।

विष्णुधर्मोत्तरपुराणे तृतीयखण्डे काव्यकलादीनां षण्णां कलानां वर्णनं कृतमस्ति। कलानां विवरणं एवं वर्तते।

काव्यकला - २ -१७ अध्यायाः
गीतकला - १८ - १९ अध्यायाः

नृत्यकला - २० - ३४ अध्यायाः
चित्रकला - ३५ - ४३ अध्यायाः
प्रतिमाकला - ४४ - ८५ अध्यायाः
प्रासादकला - ८६ - ८८ अध्यायाः

विष्णुधर्मोत्तरपुराणे इदं वास्तुशास्त्रं प्रथम गृहप्रवेशकालादारभ्य पूर्ववैदिककालादेव प्रचलति। वास्तुपुरुषस्य स्वरूपवर्णनं नृपगृहं - कर्मचराणां गृहं - प्रधानराजपुरुषाणां गृहं - कर्माधिकारिणां गृहं इत्यादि गृहादीनां प्रमाणं निरूपितम्। वास्तुसम्बन्धविषयविचारः भवति। तत्र आधुनिक सन्दर्भे वास्तुज्यौतिष शास्त्रोक्तरीत्या गृहं राजभवन निर्माणं इत्यादि विषयमधिकृत्य विचारः। वर्णक्रमेण भूपरीक्षादि प्रकरणे कालनिर्णयः, मेलापकत्वं, भूपरीक्षा, दिक्शोधनं, दिक्दशा प्रकारः, शल्योद्धारः इत्यादि विषयाणां विचारः भवति। मानादिप्रकरणे मानस्य प्रमाणप्रदर्शनार्थं मानविवरणानि, वाक्यानि निर्दिश्य अङ्गुलस्य दीर्घहस्तस्यश्च प्रमाणानि निरूपितानि।

मुहूर्त विचारः - भूग्रहणार्थं, शङ्कुस्थापनार्थं, वास्तुपूजनार्थं, दिक्शोधनार्थम् च मुहूर्त विचारः सूचितः। गेहारम्भ-द्वारस्थापन-स्तंभस्थापन - भित्तिस्थापन-अलिन्दकनिर्माणे-चित्रारम्भमुहूर्ताः इत्यादि समस्त वास्तु विषयक क्रियार्थं मुहूर्तः आवश्यकः भवति। अत्र सूतिका-स्नान - पाक - शय्या-ऽऽयुध - भोजन - धान्य - भाण्डार - कोषगृहादि षोडशगृहनिर्माणं स्थान निर्णयः , तथा सर्वतोभद्र - नन्द्यावर्त - वर्धमान - स्वस्तिक-वास्तुलक्षणं इत्यादि विचारः भवन्ति, वास्तुस्थानं पुराणस्य आवश्यकत्वम् च, निश्चितुं एकैकस्मिन्नपि विद्यमानवास्तुविषयान् संगृह्य विचारः भवति ।

भूमेः ताडनेन जलीयशिराज्ञानं धूमेन च जलज्ञानं सस्यभेदेन जलज्ञानं मरुप्रदेशे जलज्ञानं वृक्षभेदेन जलीयज्ञानं जलीययोगानां निश्चयः विकारयुक्तभूमौ जलज्ञानं भूमेर्लक्षणेन भूमेः शीतोष्णभेदेन जलज्ञानं भूमेः वर्णनेन जलज्ञानं शिलाभेदेन जलज्ञानं शिलाविदारणं च प्रभृतयः वास्तुविज्ञानान्तर्गताः सन्ति। वापी - कूपादिविचाराश्चपि वास्तुविद्यान्तर्गत एव वर्णितः।

एवं विष्णुधर्मोत्तरपुराणे ८७ अध्यायेषु कृतं षण्णां कलानां वर्णनमस्य पुराणस्य वैशिष्ट्यं प्रकटयति। अत्र च पुराणे तृतीयखण्डस्य ३५ - तमाध्यायात् ४७ तमाध्यायपर्यन्तं नवसु अध्यायेषु चित्रकला वर्णिता वर्तते। वास्तुविद्यायां तु प्रतिमाकला - प्रासादकलाश्च अत्र विध्येते।

आयामोच्छ्रयाः, प्रमाणानि, सामान्यमानानि, प्रतिमालक्षणम्, क्षयवृद्धयः, रङ्गव्यतिकरः (विविधवर्णानां विधानम्), रङ्गवर्तनम्, रूपनिर्माणम्, रसभावनिरूपणम् च। विष्णुधर्मोत्तरपुराणे[3] -

> "यथा सुमेरुः प्रवरोनगानां यथाण्डजानां गरुडः प्रधानः।
> यथा नराणां प्रवरः क्षितीशः तथा कलानामिह चित्रकल्पः" ॥

सर्वास्वपि ललितकलासु चित्रकलैव प्रधानेति विष्णुधर्मोत्तरपुराणं तत्प्राशस्त्यमेवं

वर्णयति। अभिज्ञानशाकुन्तले च नायकेन दुष्यन्तेन शकुन्तलायाश्चित्रं लिखितमिति वदन् महाकविः कालिदासः[4] –

"यद्यत् साधु न चित्रे स्यात् क्रियते तत्तदन्यथा" इति चित्रे असाधोः साधुकरणं स्तुतम्।

नारायणमुनिना तच्चित्रं सलक्षणं कृत्वा विश्वकर्मणे दत्वा तस्मै चित्रविद्यां बोधयामासेति चित्रविद्यया आविर्भावो वर्णितः। विष्णुधर्मोत्तरपुराण्[5] उक्तं भवति–

"नारायणेन मुनिना श्लोकानां हितकाम्यया
सहकाररसंगृह्य ऊर्वा चक्रे वरांस्त्रियम्
चित्रेण सा ततो जाता रूपयुक्ता वराप्सराः।
एवं महामुनिः कृत्वा चित्रं लक्षणसंयुतम्
ग्राहयामास स तदा विश्वकर्मणमच्युतम्"

एवं च चित्रकलाया आदिप्रवक्ता नारायणमुनिरिति ज्ञायते। चित्रणं कथं वा स्यादिति विषयः पुराणे एवं वर्णितः। देवतास्तु षोडशवर्षीया एव चित्रितव्या इति पक्ष्मभ्रूभ्यः, अन्यत्र शरीरभागे केशानां चित्रणं न कार्यमिति , तासाञ्च गतयः मृगेन्द्र, वृषभ, नाग, हंसगतीरनुकुर्युरिति चेत्यादयो देवताचित्रविषये नैके विशेषा अत्र विवृताः। अत्र पुराणे प्रधानतया कुड्यचित्रणामेव चित्रणमुद्दिश्य विविधांशा निरूपिताः। कुड्यचित्ररचनाय कुड्यस्य वर्णेन लेपनं आवश्यकं भवति। अतश्चित्रकारेण प्रथमं तदनुकूलं वर्णलेपनद्रव्यं कार्यं भवति। लेपनद्रव्यं कथं वा कार्यमित्यस्मिन् विषयमिधं पुराणमेवं वर्णयति। विष्णुधर्मोत्तरपुराणे[7] उक्तं –

"चित्रप्रकारेष्टकाचूर्णे ग्यंशं क्षिप्त्वा मृदस्ततः।
गुग्गुलं समधूच्छिष्टं मधुकुण्डरकं गुडम्।
कुसुम्भतैलसंयुक्तम् कृत्वा दत्त्यात्समांशकम्।
त्रिभागमग्निदग्धायाः सुधायास्तत्र चूर्णयेत्।
बिल्वजं द्व्यंशमिश्रं तत् प्रक्षिप्य मषकषम्।
वालुकांशं ततो दद्यात् स्वानुरूपेण बुद्धिमान्। इति।

उपयुक्तश्लोकानुसारं अत्र लेपकार्ये उपयोज्यानि वस्तूनि एवं वर्तन्ते। १. इष्टकाचूर्णम् २ .मृत्तिका ३ .गुग्गुलम् ४ . मधूच्छिष्टम् ५ .मधु ६.कुन्दरकम् ७. गुडम् ८. तैलसंयुक्तानि कुसुम्भपुष्पाणि ९ .अग्निदग्धा सुधा १०. बिल्वजम् ११. मषी १२ . सिकता।

एतैश्च वस्तुभिः कृतेनवर्ण लेपविशेषेण लिप्तानि शोषितानि कुड्यानि मणिभूमयः इति कथ्यन्ते। अयं च लेपः वर्षशतान्यप्यविनाशी भवति। एते च चित्रशरीराणां भूमिका भवन्ति।

शुभलक्षणस्य चित्रस्य स्वरूपं वर्णयन् एवं वर्तते। विष्णुधर्मोत्तरपुराणे[7] –

लसतीव च भूलम्भो श्लिष्यतीव तथा नृप
हसतीव च माधुर्यं सजीव इव दृश्यते

सश्वास इव यच्चित्रं तच्चित्रं शुभलक्षणम् ॥

एवं अभिलषितार्थचिन्तामणौ, शिल्परत्ने, शिल्परत्नाकरे, नारदशिल्पे , च चित्रकलासम्बन्धिनो भागा वर्तन्ते । किन्तु एते सर्वेऽपि ग्रन्थाः विष्णुधर्मोत्तरपुराणगत-चित्रसूत्रग्रन्थादनन्तरकालिका एव । अस्मिन्विषये पुराणमिदं मूर्धन्यं स्थानं भजत इति न कोपि सन्देहलेशः ॥

***Endnotes :***

[1] Manusmriti, 3.232

[2] Skandha Purana, 1.22-23

[3] Vishnudharmottara Purana, 3. 43.39 sloka

[4] Abhigyanashakuntala, 6.13 sloka

[5] Vishnudharmottara Purana, 3.35.2, 3, 4, 5 slokas

[6] Vishnudarmttara Purana, 3.4.1, 2, 3, 4, 5, 6 slokas

[7] Vishnudarmottara Purana , 43.21-22

**BIBLIOGRAPHY :**

Abhigyaanashakuntala – Jayakrishna das - Haridas gupta Chowkamba Sanskrit series office, Benaras, 1935

Manusmruti - NirnayaSagar Press, 1946

Skandhapurana – Gurumandal series 1893

Vishnudarmottara Purana, – kshemaraj, Venkateswara stearm Press, Mumbai, 1969

****